National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 213-215
© 2024 NJHSR
www.sanskritarticle.com

**अनिता महान्त**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अनिता महान्त**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्रीप्रतापचन्द्रचरितमहाकाव्ये मातृभक्तिः

**अनिता महान्त**

**महाभारते भक्तितत्त्वम् –**

भारतस्य निधिर्वेदः, वेदस्य चोपबृंणमितिहासपुराणाभ्यामभूत्। उक्तं च "इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्" इति। तत्रेतिहासपदेन रामायणमहाभारतावभिप्रेतौ। अस्मिन् महाभारते सम्पूर्ण-भारतीयजनजीवनस्य रुपं प्रतिबिम्बितमस्ति। निखिलभारतीयजनजीवने व्यासप्रणीतस्य लक्ष-सहस्रात्मकस्य महाभारतस्य प्रभावोऽतीव परिलक्ष्यते। महाभारतमिदं न केवलं भारतीयसंस्कृतेरेव रत्नभाण्डागारं विद्यते, अपि तु समस्तलौकिकपारलौकिकज्ञानविज्ञानयोर्निधिर्वर्तते। महाभारतं निखिलविषयस्य महाकोश इति प्राच्यपाश्चात्यसमस्तविद्वांस ऐककण्ठ्येन स्वीकुर्वन्ति।

श्रद्धा-विश्वास-प्रेमपरिप्लावितभक्तहृदयस्य मधुरमनोराग एव भक्तिः। यया भक्तभगवतोः, उपास्योपासकयोर्वा पारस्परिकतादात्म्यसम्बन्धस्य विर्धारणं भवति। सा भक्तस्य विमलमानसान्निःसृतस्य दिव्यप्रेमप्रवाहस्य भावधारा एव, यया लौकिकविषयानन्दः स्वसमस्तकालुष्यं परिक्षाल्या-लौकिकब्रह्मानन्दे परिणमति। भक्तानां सैव भक्तिलौकिकालौकिकसमस्तसन्तापनाशकस्य भक्तिरसस्य जननी वर्तते ।

भक्ते वर्गीकरणमतिकठिनमस्ति, यते हि भक्तिर्भवति अनेकविधा, तदाधारा अपि सन्ति विविधप्रकाराः। अथापि विभिन्नानां स्रोतसामाधाररेण भक्तेर्विभागः सम्भवति। शास्त्रीयदृष्ट्या भक्तेर्विभागस्य विवरणं विभिन्नेषु ग्रन्थेषु तत्तदाचायैः कृतमुपलभ्यते।

**का नाम भक्तिः -**

भक्तिशब्दस्य विश्लेषणेन ज्ञायते यत् भज् सेवायामिति धातोः क्तिन् प्रत्ययेन निष्पन्नो भक्तिशब्दार्थः प्रेम्णा भगवत्सेवैवास्ति । भक्तिः सर्वक्लेशनिवारिका तथेश्वरप्राप्तेः सहजं साधनमस्ति । श्रीमद्भागवतस्य तृतीयस्कन्धे भगवता कपिलेन स्वमात्रे देवहूत्यै च उपदेशो दत्तोऽस्ति । तत्र प्रतिपादितमस्ति यत् निष्कामभक्तिद्वारा जीवस्य बन्धनकारकाः क्लेशाः नश्यन्ति। तद्यथा -

**विसृज्य सर्वानन्यांश्च मामेव विश्वतोमुखम्।**
**भजन्त्यनन्यया भक्त्या तान्मृत्योरतिपारये।।**[1]

भगवतः गुणकीर्तनं नाम भक्तिः । अतः उक्तं श्रीमद्भागवते -

**नाहं तिष्ठामि वैकुण्ठे योगिनां हृदये न च ।**
**मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद ।।**[2]

अतः यदा भक्तस्य हृदि भगवद्विषयकोऽनुरागो जायते, तदा तस्य सकला चेष्टा भगवन्मयी भवति । सः आत्मनः सर्वं कार्यं भगवत्कार्यं मत्वा सम्पादयति। तथा चोक्तं श्रीमद्भागवते नवमस्कन्धे चतुर्थोऽध्याये

**स वै मनः कृष्णपदारविन्दयोर्वचासिं वैकुण्ठगुणानुवर्णने ।**
**करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ।।**[3]

पुनः उक्तमस्ति भक्तिः द्विधा यथा अनुरागात्मिका फलभक्तिः साधनभक्तिश्चेति। तत्र फलभक्तिः साधनानुष्ठानादेव सिध्यतीति न विधेया, फले विध्यभावात् । साधनभक्तिस्तु नवधा विहिता । तद्यथा -

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।**[4]

**श्रीप्रतापचन्द्रचरितमहाकाव्ये मातृभक्तिः -**

यदा प्रतापचन्द्रः पञ्चवर्षीयः आसीत् तदा तस्य जनकः दिवंगतः। माता वहुकष्टं सोढ्वा केनापि प्रकारेण प्रतापचन्द्रस्य पठनापाठनादिकं तथा सन्मार्गं अनुसरितुं किं करणीयं तद् प्रचोदितवती। पुत्रस्य उन्नत्तये मातुः आशीषः मुख्यः। वयं जानीमः यत् -**"मातृ देवो भव, पितृ देवो भव"** इति । तदनुगुणं काव्ये मतारं प्रति पुत्रस्य किं कर्तव्यं इति कविः काव्यमाध्यमेन अत्रोपस्थापयति ।

आदै तावत् प्रतापचन्द्रस्यग्रामे जनाः सर्वे शोकं परित्यक्त्वा प्रसन्नाः अभवन् । प्रतापषडङ्गी महोदयस्य आगमनेन सर्वेषां दृष्टौ आशायाः नूतनकिरणः नृत्यति इव। ग्रामस्य सर्वे जनाः तृप्ताः भवन्ति। परन्तु प्रतापचन्द्रस्य जीवनं महता दुःखैः परिपूर्णमासीत् तथापि सः जनहिताय सदा सर्वदा कार्यं करोति। यथैव वेणुः पवनेन प्रपुरीतमेव सुशब्दमात्रं जनयति तथैव तस्य जीवनम् इति । कविः अत्र वदति यत् -सर्वे मनुष्याः केवलं चन्द्रस्य चन्द्रिकायामेव दृष्ट्वा आनन्दमनुभवन्ति, परन्तु तस्य चन्द्रिकाप्रकाशस्य निर्माणार्थं चन्द्रस्य कृते यत् उतापं सहनीयं भवति तत् कोऽपि न पश्यन्ति तथैव तस्य जीवनम् ।

पुनः कविः अत्र षडङ्गीमहोदयस्य जनकः विषये वदति। जनकः सर्वदा वात्सल्येन पुत्रं परिपालयति। तदर्थं पुत्रस्य कृते पिता परमात्मास्वरूपमेव। प्रतापचन्द्रः यदा पञ्चवर्षीयः आसीत् तदा तस्य जनकः दिवंगतः। तद् दुःखं अत्यन्तं कष्टमासीत् यथा- खगः कस्मिंश्चित् साहसिकयात्रायां सदा उड्डीयते इति ।अयं कालः तस्य कृते अत्यन्तं क्रूरः आसीत्। कालः किमपि न शृणोति न च कस्यचित् दुर्दशांमपि पश्यति। स कालः चौर इव आगत्य जीवनामृतं हरतिइति । वयं सर्वे जानीमः यत् महावृक्षमाश्रित्य अनेकाः जीवाः जावन्ति। यदा महावृक्षः नष्टः भविष्यति तर्हि तस्य आश्रिताः सर्वे बहु दुःखं प्राप्नुवन्ति। तद् वद् भवति प्रतापचन्द्रस्य जीवनचरितं। तद्यथा-

**चोर इव समागत्य हरते प्राणपीयूषम्।**
**संहरते वनं कान्तं क्रन्दन्ति चित्रशाखिनः।।**
**विनश्यति यदा महावृक्षो भूमिस्थितो बली।**
**तदा तस्याश्रितानाञ्च भवति दुर्दशा किल ।।**[5]

पुनः कविः प्रतापचन्द्रस्य पितृवियोग दूरीकर्तु वर्णयति यत् – अनन्तकोटिब्रह्माण्डस्य नायकः तथा अनाथस्य नाथः महाप्रभु-जगन्नाथः प्रतिक्षणम् अरक्षितानां रक्षयति इति। सः पतितोद्धारणार्थं श्रीमन्दिरे विराजते। सः परमेश्वरः विश्वस्य नाथः इति लोके प्रख्यातः।

**अनाथस्य तदा नाथो जगन्नाथो महाप्रभुः।**
**पतितपावनश्श्यामः स पिता परमेश्वरः ॥**
**अरक्षितमनार्थं च स रक्षति प्रतिक्षणम् ।**
**अतः स कथ्यते लोके विश्वनाथो मनीषिभिः** ।।इति ।।[6]

इदानीं कविः वर्णयति यत् - पुत्रं प्रति मातुः स्नेहः किदृशमिति। माता सदा सर्वदा संसारस्य सर्वं दुःखं सोढ्वां स्व पुत्रस्य कृते सुखं प्रदताति। तस्या करुणाकल्पछाया अतीव शुशीतला स्नोहशीला च। मातुः स्नेहरूपस्य बीजं बालकाय दत्तानि परन्तु मूल्यानि तु कालान्तरे विशालवृक्षरूपेण वर्धन्ते, सम्पूर्णं समाजं स्नेहस्य फलं लभन्ते इति कवेराशयः।

अत्रैव कविः वदति यत् – यथा वर्षां विना बीजानां अङ्कुरोद्गमः नैव सम्भवति तथैव मातृस्नेहार्शीवादविना पुत्रस्य सामाजिक-संस्कार नैव संभवति । मातुः अनुशासनेन पुत्रः संस्कारितः भवति। तदनु सः समाजस्य कृते किमपिकर्तुं मनोनिवेशं करोति इति।

यथा निम्नाभिमुखि जलं कोऽपि स्वबलेन नाशं कर्तुं न शक्नोति तथैव मातुः सन्तानं प्रति यः प्रेम्णः अपि परिदृश्यतेतस्य नाशकर्त्तुं कोऽपि न शक्नोति । श्रीप्रतापस्य मातुः दुःखानि समस्याः च सूर्यस्य तप्तकिरणानाम् उष्णता इव दिने दिने वर्धन्ते स्म। परन्तु प्रतापचन्द्रस्य माता ताः समस्यायाः समाधानं स्वयं कृतवती । एतेषां कष्टानां सत्वेऽपि सा कदापि धैर्यं न त्यक्तवती । सा धैर्येण कार्यं कृतवती। यथा चन्द्रप्रकाशः अन्धकारमपि दूरीकरोति तथैव श्रीप्रतापचन्द्रस्य माता दुःखान्धकारे अपि बालस्य उपरि स्नेहप्रकाशं प्रसारयति इति । धन्या सा माता यस्याः प्रताप इव पुत्रः प्राप्तः । यः समाजस्य सुगन्धं कर्तुं आत्मानं दहति तथा च नन्दनवनस्य सौन्दर्यं आनन्दं च वर्धयति।यथा-

**नानाविधं महाकष्टमवर्धत दिने दिने।**
**विवर्धते यथा दिने चण्डरश्मिर्दिवाकरः।।**
**किन्तु तस्य प्रतापस्य जननी स्नेहस्त्रग्विणी।**
**न बभूव व्यथादग्धा धैर्यमूर्तिरिव स्थिता।।**
**घनान्धकारसंश्लिष्टे निशीथे चन्द्रिका यथा।**
**प्रकाशयति सा माता तथैव प्रेमपावनी॥**
**धन्या सा जननी यस्याश्चन्दनमिव नन्दनः।**
**नन्दनवनशोभायै स्वयमानन्दवर्धनः** ॥[7]

श्री प्रतापचन्दस्यस्य माता अतीव सौम्या कोमलाच आसीत् किन्तु सा मधुमालती लता इव आसीत् । या कस्यचित् साहाय्यं विना नैव वर्धते। तथापि मातुः प्रेम्णा परिचर्यायां वर्धमानः बालः प्रतापः अपि कल्पवृक्ष इव आसीत्, यः स्वस्य कार्यं साधयितुं कठिन परिश्रमं करोति। प्रतापस्य संवर्धनस्य कारणं मातुः प्रति भक्तिः भावना। तस्य कृते माता देवता इव पूज्या बभूव। तदर्थं तैत्तिरीयोपनिषदे विद्यते – मातृ देवो भव, पितृ देवो भव" इति। अर्थात् माता देववत् पूजयेत्। तथा श्रीप्रतापः उपनिषदस्य वचननानुसरणं कृत्वा मातरं देववत् पूजयति इति । श्री प्रतापस्य समग्रे जीवने मातुः प्रति भक्तिभावः सर्वदा स्थिरमासीत् । सः मातुः प्रति स्वकर्तव्यं निष्ठया सर्वदा निर्वहति। जीवने यत्किमपि कार्यं न केवलं स्वबुद्ध्यामपि करोति अपितु मातुः निर्देशाभ्यां अनुज्ञां च पालयति । यदा कदापि माता प्रेम्णा स्वबालकं "उत्तिष्ठ" इति आज्ञापयति तदा बालकः तस्याः आदेशान् न भयात् अपितु मातुः तस्य प्रति स्नेहात् पालनम् करोति इति। मातुः प्रेम्णः तथा तस्यादेशपालनस्य च कारणात् प्रतापस्य संस्कारचेतना प्रज्वलिताः।

**न किमपि कदा कार्यं जननीनिर्देशं विना।**
**स्वबुद्ध्या प्रेरितो भूत्वा करोति स्म कदाचन।।**
**उत्तिष्ठ ! यदि ब्रूते स्म जननी प्रेमपद्मिनी।**

**उत्तिष्ठति स्म बालोऽपि स्नेहान्न भयकारणात्।।**[8]

पुनः माता पृथिव्याः रूपम्। माता परममित्रं, माता जीवनस्य प्राणवायुवत्। माता स्नेहस्य अतलः जलाशयः इति। प्रसङ्गेऽस्मिन् अथर्ववेदस्य एका सूक्ति मनसि आगच्छति। यथा-

**माता भूमिः पुत्रोऽहं पृथिव्याः**

अर्थात् अत्र मातुप्रति पुत्रस्य या श्रद्धा तथा प्रेमभावः अत्रैव स्पष्टतया परिस्फुरति इति। मातुः महिमा पुराणेषुऽपि प्राप्यते। तद्यथा- भगवान् गरुडस्य माता विनता, मर्यादापुरुषभगवतः श्रीरामस्य माता कौसल्या,लुव-कुशयो माता सीता, नन्दनन्दन भगवतः श्रीकृष्णस्य माता यशोदायाः कथाऽपिवर्णिता। यथा-

**पुराणेष्वेनेकेषु च प्राप्यते वर्णनं यथा।**
**विनतामर्चयन्नेव ववर्ध गरुडो गुरुः ॥**
**यथा कौसल्यया रामो लवकुशौ च सीतया।**
**यथा यशोदया स्नेहाद्ववर्ध नन्दनन्दनः।।**[9]

पुनः कवि वर्णयति प्रतापचन्द्रस्य मातृप्रेमस्य सुगन्धः तथा तस्याः भक्तिपुष्पं च अद्यापि तस्य हृदये उज्जीवति। एषः सौरभः सामान्यजनांकृते सत्कर्म कर्तुं प्रेरयति । पुनः कविः वदति यत् मातुः आर्शीवादवलेन श्री प्रतापचन्द्रस्य प्रकाशः सर्वत्र एव प्रकाशयति इति मम विश्वासः । प्रतापेन कृतस्य कार्यस्य चन्द्रप्रकाशं रात्रौ विना अपि सर्वत्र प्रसरति। तत् सौन्दर्यं वर्णयितुं ममपार्श्वे नैपुण्य नास्ति इति कवेराशयः । समग्र जगते मातुः कार्यम् अद्वितीयम्। सा महान्, तस्या स्नेहार्शीवाद तथा उत्तमशिक्षा प्रदानेन बालकाः समाजे तस्या प्रतिष्ठां वर्धयन्ति। तदर्थं शास्त्रेषु विद्यते माता महीयसी, गरीयसी, वसुन्धरा च इति। साम्प्रतिकसमये यः भक्त्यां स्वमातरं पूजयति सः परागतिम् अर्थात् मोक्षं प्राप्स्यति इति नास्ति सन्देहः । काव्यकारः वदति यथा-

**माता महीयसी नूनं माता चैव गरीयसी।**
**माता वसुन्धरा यस्या वसु कदा न दृश्यते ॥**
**यः पूजयति तां भत्क्त्या विना पुष्पं विना फलम्।**
**विना चार्ध्वं विना मन्त्रं सोऽपि याति परां गतिम् ।।**[10]

पुनः मातुः महिमा विषये वदति यथा – विश्वेस्मिन् विश्वे कः एतादृशः समर्थः प्रतिभासम्पर्णः व्यक्तिः आसीत् यः मातुः प्रेम्णः, मातुः कृपां च वचनेन वा व्यक्तं कर्तुं समर्थः अस्ति ? अर्थात् मातुः प्रेम्णः वर्णयितुं एतादृशः व्यक्तिः नास्ति इति। मातृप्रेमः अवर्णनीयः इति।

अस्माकं भारतीयसंस्कृतिः अतीव शुद्धा गौरवपूर्णा च अस्ति। यत्र जीजाबाई इत्यादयः मातरः पुनः पुनः जन्मं कुर्वन्ति। पूर्वजानां कथां कथयित्वा स्वसन्तर्तिं प्रेमामृतेन पोषयन्ति च। अस्माकं देशस्य यशस्वीप्रधानमन्त्रीनरेन्द्रमोदीमहोदयस्य माता हिराबाई स्वस्नेहस्य अमृतेन सिञ्चनं कृत्वा पुत्रं पोषितवती।

**अस्माकं संस्कृतिश्शुभा जिजाबाई पुनः पुनः।**
**संस्मरन्ती पवित्रां च सिञ्चति पुण्यपीयूषम्।।**
**हिराबाई यथा देवी नरेन्द्रं वीरविक्रमम्।**
**मोदिनं वर्धयामास ममतारसपीयूषैः ।।**[11]

रामायण-महाभारतादि ग्रन्थे मातुः महिमाऽपि परिदृश्यते। सर्वेषा मनसि प्रतिध्वनित्वं भवति मर्यादापुरुषोत्तमश्रीरामस्य माता कौसल्यायाः स्नेहाश्रीवादः तथा नन्दनन्दनश्रीकृष्णस्य माता यशोदायाः वात्सल्यभावः । यथा-

**भवतु विपुले विश्वे पूजितो रघुनन्दनः।**
**किं मानवा न जानन्ति कौसल्यायास्तपोबलम्।**
**मनःसु किं न गायन्ति देवकीपुण्यसंगीतम्।**
**हृदये न जपामो किं यशोदाकीर्तिगौरवम्।।**[12]

पुनः पण्डामहोदयः जनक-जननी मध्ये तुलनां करोति। काव्यकारस्य मतानुसारेण यदि पिता समुद्रः, तर्हि माता तु स्रोतस्विनी। यद्यपि पिता निर्जीवः पादपः भवेत्, परन्तु माता सर्वदा कोमलावनी, यद्यपि पिता पावकः माता तु जलधारिणी इव। सा तुः मधुरस्नेहः सर्वदा बालस्य हृदये आनन्दस्य तरङ्गाः सृजति इति ।प्रतापचन्द्रषडङ्गीमहोदयः राजनीतिषु न प्रविष्टवान् यावत् पर्यन्तं तस्य मधुरभाषिणी स्नेहमयी माता स्वेच्छया प्रवेशं कर्तुं न आज्ञादत्तवति। तस्य माता समाजस्य सेवां कर्तुं पुत्रस्य कृते उक्तवती। प्रतापचन्द्रमहोदयः मातुराज्ञया राजनीतिं मध्ये प्रविश्य समाजस्य कृते सत्कार्यं कर्तुं प्रारब्धवान्।

**उपसंहारः -**

एवं प्रकारेण काव्ये मातृभक्ति विषयक कथा वर्णिता । साम्प्रतिक समाजस्य कृते मातृप्रेमभाव जाग्रतकरणीयमेव कवेः भावना इति अहं चिन्तयामि ।

**सहायकग्रन्थसूची**


1.महाभारतम् – गीताप्रेस, गोरखपुर।

2.श्रीप्रतापचन्द्रचरितमहाकाव्यम् – डा.रविन्द्रकुमार पण्डा, न्यु भारतीयबुक् कर्पोरेशन्, 2022

3.श्रीमद्भागवतमहापुराणम् – गीताप्रेस, गोरखपुर।

4.श्रीमद्भागवतमहापुराणम् – चौखम्बासुरभारती, वाराणासी।


**पाद टिप्पणी**

[1] श्री.भा. 3/26/43-44

[2] श्री.भा. 4/21/41

[3] श्री.भा. 9/4/18

[4] श्री.भा. 7/5/23-24

[5] प्र.च.म. 9/7-8

[6] प्र.च.म. 9/10-11

[7] प्र.च.म. 9/16-19

[8] प्र.च.म. 9/26-27

[9] प्र.च.म. 9/30-31

[10] प्र.च.म. 9/38-39

[11] प्र.च.म. 9/41-42

[12] प्र.च.म. 9/43-44